International Journal of Sanskrit Research 2018; 4(1): 126-127

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2018; 4(1): 126-127
© 2018 IJSR
www.anantaajournal.com
Received: 15-11-2017
Accepted: 16-12-2017

**डॉ० परमेश्वर साहु**
बथनाहा, तमुरिया, मधुबनी, बिहार, भारत

**Corresponding Author:**
**डॉ० परमेश्वर साहु**
बथनाहा, तमुरिया, मधुबनी, बिहार, भारत

# रप्रत्याहारखण्डनमण्डनविचारः

**डॉ० परमेश्वर साहु**

**सारांश**
पणिनीयशास्त्रस्य सर्वशास्त्रोपकारित्वं नाविदितं सचेतसाम्। तत्र नैके तादृषा विषयाः क्रोडीकृताः याँश्च दृष्ट्वा च्मत्करोति चित्तम्। तादृशोऽयं कश्चन विषयः रप्रत्याहारः। यद्यपि कण्ठरवेण न क्वापि सूत्रकारेण न वा वार्त्तिककृता न च भाष्यकारेणोद्घुष्टस्तथपि विषयोऽयं प्राधान्यं भजते शास्त्रेऽस्मिन्। तत्र कैमर्थिकोऽयं रप्रत्याहार आवश्यकः? अस्याङ्.गीकारे किं फलम्? नव्यानां तत्र किमभितम्? कथञ्च नव्यैर्रिरस्यते? निरस्नस्य कथङ्.कारञ्च प्रतिप्रसवः? इत्येते विषयाः क्रमशः अत्र उल्लिख्यन्ते।

**प्रमुख शब्दाः—** रप्रत्याहारः, पक्षः, पक्षतावच्छेदकः, साध्यः, हेतुः भागासिद्धिः, अनुबन्धः।

**बाङ्.मुखम्—**
तत्र ''कृष्णर्द्धिः'' इत्यादौ ''उरण् रपरः'' [1] इत्यनेन रपरत्वे जातेऽपि ''तवल्कारः'' इति निष्पत्तौ लपरत्वाविधानात् स्यात्कश्चन क्लेशस्तदर्थं ''तुल्यास्यप्रयत्नं सवर्णम्'' [2] इति सूत्रे भाष्ये ''लपरत्वं वक्ष्यामि'' इति भाष्यकारैरभिहितम्। तदेव लिङ्.गमाश्रित्य कैयटेन रप्रत्याहाररूपेण व्याख्यास्यामीत्युक्तम्। ततश्च ''लण्'' ''सूत्रस्थ'' ''अ'' कारस्यानुनासिकप्रतिज्ञया तस्य च उपदेशेऽजनुनासिक इत् इत्यनेन इत्संज्ञया लोपे च हयवरट्सूत्रस्थरेफेन प्रत्याहारं प्रकल्प्य ''र'' प्रत्याहार उद्भावितः। तेन रप्रत्याहारे रलयो ग्रहणत्वात् ''उरण् रपरः'' इति सूत्रे ''र'' इत्यनेन प्रत्याहाराङ्.गीकारात् ऋकारस्थाने रपरः लृकारस्थाने च लपरः तेन नवल्कारः इति रुपसिद्धौ न काचित् विप्रतिपत्तिरिति प्रत्यापादि कैयटेन। तदिह नव्यातिनव्येन व्याकरणजलधिसन्तरणचतुरेण श्रीमता नागेशभट्टेन निरस्यते। वस्तुतः लण्सूत्रस्थाकारस्य अननासिककल्पनमयुक्तं तत्प्रयुक्तरप्रत्याहारश्चायुक्तः। अन्यथा ''अतो ल्रान्तस्य'' इति सूत्रे रप्रत्याहारेणैव व्यवहारसम्भवे अर्धमात्रालाघवत्वात् लकारमेव नोच्चरयेत्सूत्रकारः। ननु अत्र सूत्रे लकारोच्चारणं रप्रत्याहारस्यानित्यतां ज्ञापयति तेन ''रषाभ्यां नो णः समानपदे'' [3] रदाभ्यां निष्ठातो.... इत्यादिषु रप्रत्याहारो नाङ्ऋगीक्रियते तेन कमलानामित्यत्र णत्वं न भवति प्रफुल्लतः इत्यत्र नत्वं च न भवति। एतादृशमस्वारस्यं मनसि निधाय द्वितीयापत्तिं प्रदर्शयति नागेशो यत् अकारस्येत्संज्ञया यथा रप्रत्याहारो भवति तथैव यप्रत्याहारोऽपि सम्भवेत् तेन यण्घटितेषु सूत्रेषु यप्रत्याहारेणैव व्यवहारसम्भवे प्रत्येकमर्धमात्रालाघवेन यण्प्रत्याहारमेव न कल्पयेत्। परं तथा सति यथा ''यप्रत्याहारो'' भवेत् तथा इकारेणापि प्रत्याहारे जाते ''इण्'' प्रत्याहारस्थाने ''य'' प्रत्याहार एव स्यात् एवमेव अण्प्रत्याहारस्थाने ''आ'' प्रत्याहारः स्यात् सदा ''योऽचि'' ''यस्येति च'' इत्यादौ सन्देहः स्यात् यत् किमत्र प्रत्याहारो ग्राह्यो वा वर्णो वा? पुनरेतादृशमस्वारस्यं प्रकल्प्य किञ्चेत्यनेन तृतीयापत्तिमाविष्करोति यत् अनुबन्धानाम् अच्प्रत्याहारे ग्रहणं न भवतीत्यं भाष्यकारैः। आचारात् अप्रधानत्वात् लोपश्च बलवत्तरः इति। अर्थात् आचार्याणां व्यवहारात् अच्प्रत्याहारे अनुबन्धानां ग्रहणं न भवति द्वितीयं कारणम् अप्रधानत्वात् अर्थात अच्प्रत्याहारे अचामेव प्राधान्यात् हलामप्रधानत्वात् अनुबन्धानां ग्रहणं न भवति। तथा च ''लोपश्च बलवत्तरः'' लोपशास्त्रेण ''तस्य लोपः'' [4] इत्यनेन आक्रान्तत्वात् तेषां ग्रहणं न भवति। प्रकृते लण्सूत्रस्थ ''अकारस्य'' इत्संज्ञायां लोपे च रप्रत्याहाराङ्.गीकारे भाष्योक्ततृतीयहेतोरव्यापकतापत्तिः। तथा हि अनुमितिप्रकार इत्थम्— अनुबन्धाः प्रत्याहारजन्यबोधविषयत्वाभाववन्तः लोपशास्त्रीयोद्देश्यतावच्छेदकाक्रान्तत्वात्। लोपशास्त्रीयोद्देश्यतावच्देदकाक्रान्तत्वमत्र हेतुः अनुबन्धश्चात्र पक्षः। एवञ्च हेतुः अनुबन्धरूपके प्रत्येकपक्षे सयात् सदैव पक्षतावच्छेदकव्यापकः स्यात्। प्रकृते लण्सूत्रस्थस्य अकारस्यानुबन्धत्वस्वीकारेऽपि हल्प्रत्याहारात्प्राक् अच्प्रत्याहारनिषत्त्यभावे ''उपदेशेऽजनुनासिक इत्'' [5] इत्यस्याप्रवृत्त्या लोपाभावः। तस्मात्पक्षे हेतोः अव्यापकत्वात् ''पक्षेकदेशावृत्तित्वं भागासिद्धिः'' इति दोषो भवति। किञ्च ''अकारस्य'' सम्प्रति हल्प्रत्याहारे प्रवेशे ''मामाँस्त्रयस्व'' इत्यत्र माम् आन्। त्रायस्व इत्यवस्थायां ''मकारस्य'' अनुस्वारापत्तिः। ननु व्यक्तिपक्षे लण्सूत्रस्थाकारों भिन्न एव।

तस्मादनुस्वारो न स्यादिति चेत् अणुदित्सूत्रे अण्ग्रहणं प्रत्याख्याय प्रत्याहारे जातिपक्षस्याङ्.गीकारात् न तथापत्तिः। किञ्च सोऽस्ति इत्यत्रापि अकारस्य हल्त्वात् एतत्तदोः...... इत्यनेन सुलोपापत्तिः।

अत एव लण्सूत्रस्थाकारस्याननुनासिकत्वात् रप्रत्याहाराभावे च अग्रिमभाष्यं संगच्छते यत् वर्णसमाम्नाये य एतेऽक्षु अज्बोधकसूत्रेषु प्रत्याहारार्थ येऽनुबन्धाः क्रियते तेषामज्ग्रहणेन कस्माटन्न ग्रहणमिति अच्प्रत्याहारे एव शङ्.का कृता समाहितञ्च तत्र। यदि लण्सूत्रस्थ ''अ'' कारोऽपि तथा स्त्र्र्रात् तर्हि तत्रापि शङ्.का कृमता स्यात् समाधानञ्चोक्तं स्यात्। तस्माद् ''अ'' कारस्थानुनासिकल्पनमप्रामाणिकं रप्रत्याहारश्च नैव भाष्यसम्मतः। ननु लपरत्वाभावे कथं तर्हि तलल्कारः इति रूपं सिद्ध्येत् इति चेत् ''उरण् रपरः'' इत्यत्र ''उरण् रलपरः'' इति न्यासः कार्य इति नागेशाशयः।

**निष्कर्षः**

इत्संज्ञकयोग्यत्वमनुबन्धत्वमिति ऊररीकृत्य तृतीयहेतोः याऽव्यापकतापत्तिरुद्भाविता तन्न साधीयसी। यतो हि तथा सति हल्प्रत्याहारात्प्राक् अच्प्रत्याहारानिष्पत्तौ इत्संज्ञाभावेन अनुबन्धत्वमेव न स्यात् तथा सति स पक्ष एव न स्याच्चेत् कथं वा हेतोरव्यापकतापत्तिः।

द्वितीयञ्च नागेशमतानुसारेण उच्चारणार्थकवर्णानामपि निवृत्तिः इत्संज्ञया लोपेन च भवतीति ''दिव औत्'' [6] इति सूत्रे स्वयं तेनैवोदीरितम्। तथा सहित हल्प्रत्याहारात्सिद्धेः प्राक् यथा लण्सूत्रस्थाकारः नेत्संज्ञको न वा लुप्यते तथैव हकारादिष्वकारोऽपि तथा स्यात्। तेन तेष्वपि पक्षतावच्छेदकाव्यापकत्वदोषः स्यात्।

एवञ्च उरण् रपरः इति स्थाने उरण् रलपरः इति न्यासं प्रकल्प्य रप्रत्याहारखण्डनापेक्षया रप्रत्याहाराङ्.गीकारे लाघवं स्यात्। ये च दोषास्तत्रोद्भाविताः ते सर्वेऽपि समाहिताः। एवञ्च न्यासान्तरकल्पनमयथायथमित्यलं विस्तरेण।

**सन्दर्भाः**


1. पणिनीय सूत्रम् – 1/1/5 ।
2. पणिनीय सूत्रम् – 1/1/9 ।
3. पणिनीय सूत्रम् – 8/4/1 ।
4. पणिनीय सूत्रम् – 1/3/9 ।
5. पणिनीय सूत्रम् – 1/3/2 ।
6. पणिनीय सूत्रम् – 7/1/84 ।